# A-I/1/22AVDS1CCTC1/23

**प्रथमसत्रार्द्धः**

**प्रथमपत्रम् (DSCC-16)**

**वेदः**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. वेददीप इति भाष्यस्य लेखकः कः?
2. माध्यन्दिनसंहितायाः प्रथमाध्याये कति कण्डिकाः सन्ति?
3. इषे इति शब्दस्य कोऽर्थः?
4. महीधरः भाष्यारम्भे कस्य स्तुतिं करोति?
5. सुप्वा इति शब्दस्य कोऽर्थः?
6. संयवनं नाम किम्?
7. आद्युदात्तकृष्णशब्दस्य कोऽर्थः?
8. आखरेष्ठः इति कस्य विशेषणम्?
9. वेदिशब्दस्य कोऽर्थः?
10. वीतिहोत्रशब्दस्य कोऽर्थः?
11. पिण्डपितृयज्ञमन्त्राः कस्मिन् अध्याये प्रोक्ताः सन्ति?
12. द्वितीयाध्याये कति कण्डिकाः सन्ति?
13. विष्णुक्रमः नाम किम्?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. वीतिहोत्रं त्वा कवे द्युमन्तं समिधीमहि। अग्ने बृहन्तमध्वरे॥ इति मन्त्रं व्याख्यात।
15. गायत्रेण त्वा छन्दसा परिगृह्णामि. . . . . .पयस्वती च॥ इति मन्त्रं व्याख्यात।

16. अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं. . . . .सत्यमुपैमि ॥ इति मन्त्रं व्याख्यात।
17. सा विश्वायुः सा विश्वकर्मा इति मन्त्रं सविनियोगं व्याख्यात।
18. पुरा क्रूरस्य विसृपः इति मन्त्राभिप्रेतम् आख्यानम् उल्लिखय व्याख्यात।
19. अग्नये कव्यवाहनाय स्वाहा. . . . . .वेदिषद ॥ इति मन्त्रं व्याख्यात।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. दर्शपूर्णमासयागस्य महत्त्वं वर्णयत।
21. 'प्रकृतित्वात् दर्शपूर्णमासमन्त्राणाम् आदौ उपदेशः' इति कथनं सयुक्तिकं प्रतिपादयत।
22. यजुर्वेदस्य वैशिष्ट्यम् उपपादयत।

# A-I/2/22AVDS1CCTC2/23

**प्रथमसत्रार्द्धः**

**द्वितीयपत्रम् (DSCC-17)**

**वेदः**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. माध्यन्दिनशतपथे कति काण्डानि सन्ति?
2. 'अनृतं मनुष्याः' इति वाक्यस्य कोऽर्थः?
3. यदि नाश्नाति पितृदैवत्यो भवतीति मतं कस्य ऋषेः अस्ति?
4. सायणभाष्यस्य नाम किम्?
5. पवित्रे स्थो वैष्णव्यौ इति मन्त्रस्य दर्शपूर्णमासे कुत्र विनियोगः भवति?
6. दर्शपूर्णमासे कति अग्नयः भवन्ति?
7. 'नान्तरेण सञ्चरेयुः' इति वाक्यस्य कोऽर्थः?
8. शुक्लयजुर्वेदस्य ब्राह्मणं किम्?
9. दर्शपूर्णमासे कति ऋत्विजः भवन्ति?
10. अध्वर्युः कस्य वेदस्य भवति?
11. वृत्रशब्दस्य कोऽर्थः?
12. उत्पवनं नाम किम्?
13. अनिरुक्तः कः भवति?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. मधुजिह्व इति शब्दस्य यथाब्राह्मणं व्याख्यानं कुरुत।
15. हविष्कृदेहीति मन्त्रस्य तात्पर्यं विशदयत।

16. स वा आरण्यमेवाश्नीयात् इति वाक्यं विशदयत।

17. कृष्णाजिनस्य यज्ञरूपतां निरूपयत।

18. अग्नेस्तनूरसि वाचो विसर्जनम् इति मन्त्रं ब्राह्मणानुसारं व्याख्यात।

19. द्वयं वा इदन्न तृतीयमस्ति इति वाक्यांशं सप्रसङ्गं निरूपयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. सायणाचार्यस्य परिचयमुपस्थापयत।

21. शतपथब्राह्मणस्य वैशिष्ट्यं प्रतिपादयत।

22. दर्शपूर्णमासयागस्य स्वरूपं वर्णयत।

# A-I/3/22AVDS1CCTC3/23

**प्रथमसत्रार्द्धः**

**तृतीयपत्रम् (DSCC-18)**

**वेदः**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. सायणाचार्यः कस्य वेदस्य भाष्यं प्रथमं लिखितवान् ?
2. जुहूः कस्य वृक्षस्य भवति ?
3. आधाने रथकारस्य अधिकारः अस्ति न वा ?
4. कात्यायनानुसारं यजुषां लक्षणं किम् ?
5. अध्वर्युशब्दस्य कोऽर्थः ?
6. अनियमं वात्स्यः इति सूत्रस्य कोऽर्थः ?
7. चतुर्णाम् ऋत्विजां नामानि लिखत।
8. दर्शपूर्णमासे वेदबन्धनं कदा कार्यम् ?
9. उपभृत् कस्य वृक्षस्य भवति ?
10. कर्मणां युगपद्भावस्तन्त्रम् इति सूत्रस्य कोऽर्थः ?
11. शाकलशाखा कस्य वेदस्य भवति ?
12. उरु प्रथस्व इति मन्त्रस्य कुत्र विनियोगः ?
13. परिसंख्यायां कति दोषाः प्राप्नुयुः ?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. फलयुक्तानि कर्माणि इति सूत्रं व्याख्यायत।
15. यजति-जुहोतीनां भेदं यथासूत्रं प्रतिपादयत।

16. तेषां वाक्यं निराकाङ्क्षम् इति सूत्रं व्याख्यात।

17. आध्वर्यवस्य यज्ञेषु प्राधान्यात् व्याकृतः पुरा इति श्लोकांशं स्पष्टयत।

18. अभिधानेऽर्थवादः इति सूत्रं व्याख्यात।

19. ऋग्वेदस्य अभ्यर्हितत्वं निरूपयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. अर्थवादस्य प्रामाण्यं निरूपयत।

21. वेदलक्षणं सायणाचार्यदिशा प्रतिपादयत।

22. मन्त्रान्ते कर्म कर्तव्यम् इति मतं प्रतिपादयत।

# A-I/4/22AVDS1CCTC4/23

## प्रथमसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-19)

## शुक्लयजुर्वेदः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. हविर्निर्वापो नाम किम्?
2. यज्ञतत्त्वप्रकाशस्य लेखकः कः?
3. अर्थसंग्रहानुसारं धर्मलक्षणं किम्?
4. अथातो धर्मजिज्ञासा इत्यत्र अथशब्दः कस्य आनन्तर्यं सूचयति?
5. भावना कतिविधा?
6. पौर्णमास्यां त्रीणि प्रधानानि कानि?
7. आग्नेयः कति कापालात्मकः पुरोडाशः भवति?
8. आर्थीभावनायाः लक्षणं किम्?
9. आर्थीभावनायाः अंशत्रयं लिखत।
10. विधिमन्त्रादिभेदेन वेदः कतिविधः भवति?
11. अज्ञातार्थज्ञापकवेदभागस्य नाम किम्?
12. उदितानुदितहोमविचारः कस्मिन् कर्मणि भवति?
13. वत्सापाकरणं कस्याम् इष्टौ भवति?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. पत्नीसंयाजं विवृणुत।
15. भावनालक्षणं विशदयत।

16. अर्थसंग्रहानुसारं वेदलक्षणं प्रतिपादयत।
17. वेदस्य धर्मप्रतिपादकत्वं निरूपयत।
18. पौर्णमासीदिनकृत्यं संक्षेपेण प्रतिपादयत।
19. आधानपवमानेष्टीनाम् अङ्गाङ्गीभावम् उपपादयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. अग्निहोत्रस्य महत्त्वं प्रतिपादयत।
21. आधानोपयोगिद्रव्याणां पात्राणां च वर्णनं कुरुत।
22. चतुर्विधविधिम् अर्थसंग्रहदिशा विवृणुत।